International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 210-213
© 2019 IJSR
www.anantaajournal.com
Received: 25-07-2019
Accepted: 27-08-2019

**Venkateswaralu R**
Department of Sanskrit,
Acharya Nagarjuna University,
Andhra Pradesh, India

**Correspondence**
**Venkateswaralu R**
Department of Sanskrit,
Acharya Nagarjuna University,
Andhra Pradesh, India

# धर्मशास्त्र ज्योतिषशास्त्रयोः षोडशसंस्कारविचारः संस्काराणां भेदाः

**Venkateswaralu R**

## प्रस्तावना

### संस्काराणां संख्याविषये भिन्न भिन्न मतानि

संस्काराणां संख्याविषये मतभिन्नता दृश्यते। तत्र केचन एकादशसंस्कारविषये केचन त्रयोदशसंस्कारविषये केचन षोडशसंस्कारविषये केचन पञ्चविंशतिसंस्कारविषये केचन चत्वारिंशत्संस्कारविषये तथैव केचन अष्टचत्वारिंशत्संस्कारविषये च उल्लिख्यन्ते। तत्र पुनः संस्काराणां प्रारम्भविषयेऽपि मतभिन्नता दृश्यते। केचन विवाहतः केचन च गर्भाधानतः संस्काराणां प्रारम्भः कुर्वन्ति। तत्र प्रायः गृह्यसूत्रादिषु विवाहतः संस्काराणां प्रारम्भः दृश्यते। स्मृतिषु प्रायः गर्भाधानतः संस्काराणां प्रारम्भता दृश्यते। तत्र संस्काराणां संख्या तथा नामानि गृह्यसूत्र-स्मृति-निबन्धादिग्रन्थदृष्ट्वा अग्रे विचार्यते।

### आश्वालयनगृह्यसूत्रम्

तत्रादौ आश्वालयनगृह्यसूत्रे एकादशसंस्कारविषये उल्लिख्यते। अत्र विवाहतः संस्काराणां प्रारम्भता परिलक्ष्यते। यथा –

| | | |
|---|---|---|
| 1) विवाहः, | 2) गर्भाधानम्, | 3) पुसंवनम्, |
| 4) सीमन्तोन्नयनम्, | 5) जातकर्म, | 6) नामकरणम्, |
| 7) चूडाकर्म, | 8) अन्नप्राशनम्, | 9) उपनयनम्, |
| 10) समावर्तनम्, | 11) अन्त्येष्टिः। | |

### पारस्करगृह्यसूत्रम्

पारस्करगृह्यसूत्रे त्रयोदशसंस्काराः उपस्थापिताः। अत्रापि आश्वालयनवत् विवाहतः संस्काराणां प्रारम्भता दृश्यते। यथा –

| | | |
|---|---|---|
| 1) विवाहः, | 2) गर्भाधानम्, | 3) पुंसवनम्, |
| 4) सीमन्तोन्नयनम्, | 5) जातकर्म, | 6) नामकरणम्, |
| 7) निष्क्रमणम् | 8) अन्नप्राशनम्, | 9) चूडाकर्म, |
| 10) उपनयनम्, | 11) केशान्तः, | 12) समावर्तनम्, |
| 13) अन्त्येष्टिः। | | |

### बौधायनगृह्यसूत्रम्

बौधायनगृह्यसूत्रेऽपि पारस्करवत् त्रयोदशसंस्कारविषये उल्लिखिताः। परन्तु तत्र केशान्तसंस्कारः न दृश्यते। कर्णवेधः नाम एक पृथकसंस्कारः तत्र दृश्यते। विवाहादयापराः संस्काराः यथावत् प्राप्यन्ते। यथा –

| | | |
|---|---|---|
| 1) विवाहः, | 2) गर्भाधानम्, | 3) पुंसवनम्, |
| 4) सीमन्तोन्नयनम्, | 5) जातकर्म, | 6) नामकरणम्, |
| 7) निष्क्रमणम् | 8) अन्नप्राशनम्, | 9) चूडाकर्म, |
| 10) उपनयनम्, | 11) कर्णवेधः, | 12) समावर्तनम्, |
| 13) अन्त्येष्टिः। | | |

### वाराहगृह्यसूत्रम् -

अत्रापि त्रयोदशसंस्कारविषये प्रतिपादिताः। परन्तु संस्काराणां प्रारम्भः विवाहतः न दृश्यते। जातकर्मादारभ्यते। तथा अत्र पृथकरूपेण गोदानाख्यसंस्कारस्योल्लेखः दृश्यते। यथा –

1) जातकर्मः, 2) नामकरणम्, 3) दन्तोद्गमनम्,
4) अन्नप्राशनम्, 5) चूडाकर्म, 6) उपनयनम्,
7) वेदव्रतानि, 8) गोदानम्, 9) समावर्तनम्,
10) विवाहः, 11) गर्भाधानम्, 12) पुंसवनम्,
13) सीमन्तोन्नयनम्।

**खादिरगृह्यसूत्रम्**
खादिरगृह्यसूत्रे षोडशसंस्काराः वर्णिताः। ते यथा –
1) विवाहः, 2) गर्भाधानम्, 3) पुंसवनम्,
4) सीमन्तोन्नयनम्, 5) निष्क्रमणम्, 6) जातकर्म,
7) नामकरणम्, 8) चूडाकरणम्, 9) उपनयनम्,
10) केशान्तः, 11) उपाकर्म, 12) उत्सर्जनम्,
13) आश्वयुजीकर्म, 14) आग्रहायणम्, 15) अष्टका,
16) अन्वष्टकाचेति।

**गोभिलगृह्यसूत्रम्**
गोभिलगृह्यसूत्रे एकविंशतिसंस्काराः प्रदर्शिताः। ते यथा –
1) विवाहः, 2) गर्भाधानम्, 3) पुंसवनम्,
4) सीमन्तोकरणम्, 5) सोष्यन्तीहोमः, 6) जातकर्म,
7) मेधाजननम्, 8) निष्क्रमणम्, 9) नामधेयम्,
10) पोष्ठकम्, 11) मूर्धाभिघ्राणम्, 12) चूडाकरणम्,
13) उपनयनम्, 14) समावर्त्तनम् 15) श्रवणाकर्म,
16) आश्वयुजीकर्म, 17) आग्रहायणी, 18) अष्टका,
19)अन्वष्टका, 20) पिण्डपितृयज्ञः, 21) शाकाष्टका चेति।

**वैखानसगृह्यसूत्रम्**
वैखानसगृह्यसूत्रे अष्टादशसंस्काराणां नामानि उपलभ्यन्ते। ते यथा-
1) ऋतुसंगमनम्, 2) गर्भाधानम्, 3) सीमन्तः,
4) विष्णुबलिः, 5) जातकर्मः, 6) उत्थानम्,
7) नामकरणम्, 8) अन्नप्राशनम्, 9) प्रसवागमनम्,
10) पिण्डवर्धनम्, 11) चोलकर्म, 12) उपनयनम्,
13)पारायणम्, 14) व्रतबन्धविसर्गः, 15) उपाकर्म,
16)उत्सर्जनम्, 17) समावर्तनम्, 18) पाणिग्रहणम्।

**गौतमधर्मसूत्रम्**
पुनश्च गौतमधर्मसूत्रे चत्वारिंशत् संस्काराः अष्टौ आत्मगुणाश्च उल्लिखिताः। तत्र गौतमेन गर्भाधानादेव संस्काराणां प्रारम्भः क्रियते। यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामकरणम्, 6) अन्नप्राशनम्,
7) चौलम्, 8) उपनयनम्, 9-12) चत्वारि वेदव्रतानि,
13) स्नानम्, 14) सहधर्मचारिणीसंयोगः, 15-19) पञ्चमहायज्ञाः,
20) अष्टका, 21) पार्वणम्, 22) श्राद्धम्,
23)श्रावणी, 24) आग्रहायणी, 25) चैत्री,
26) आश्वयुजी (एते अष्टकादयः सप्तपाकयज्ञसंस्थाः)
27) अग्न्याधेयम्, 28) अग्निहोत्रम्, 29) दर्शपौर्णमासी,
30) चातुर्मास्यम्, 31) आग्रयायणेष्टिः, 32) निरूढपशुबन्धः,
33) सौत्रामणिः (एते अग्न्याधेयमादयः सप्तहविर्यज्ञाः)
34) अग्निष्टोमः, 35) अत्यग्निष्टोमः, 36) उक्थः,
37) षोडशी, 38) वाजपेयम्, 39) अतिरात्रम्,
40) आप्तोर्याम (एते अग्निष्टोमादयः सप्तसोमयज्ञसंस्थाः)।

**मनुस्मृतिः**
मनुस्मृतौ तु गर्भाधानात्संस्काराणां प्रारम्भता दृश्यते। तत्र त्रयोदशसंस्काराणां विषये मनुना स्वीयस्मृतौ उल्लिख्यते। ते यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामधेयम्, 6) निष्क्रमणम्,
7) अन्नप्राशनम्, 8) चूडाकर्म, 9) उपनयनम्,
10) केशान्तः, 11) समावर्त्तनम्, 12) विवाहः,
13) श्मशानम्।

**याज्ञवल्क्यस्मृतिः**
याज्ञवल्क्येन मनूक्त त्रयोदशसंस्कारेषु केशान्तसंस्कारः न स्वीक्रियते। अपराः द्वादशसंस्काराः स्वीक्रियन्ते। यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामकरणम्, 6) निष्क्रमणम्,
7) अन्नप्राशनम्, 8) चूडाकर्म, 9) उपनयनम्,
10) समावर्त्तनम्, 11) विवाहः, 12) श्मशानम्।

प्रसङ्गेऽस्मिन् प्राप्यते याज्ञवल्क्यस्मृतौ आचाराध्याये –

गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्परा।
षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्॥
एवमेनः शमं याति बीजगर्भसमुद्भवम्।
तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः॥
गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्[1] ॥इति॥

**लोगाक्षिस्मृतिः**
लोगाक्षिस्मृतौः एकादशसंस्काराणां विवरणमुपलभ्यते। अत्रापि गर्भाधानात्संस्काराणां प्रारम्भता दृश्यते। यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामकरणम्, 6) अन्नप्राशनम्,
7) चौलम् 8) मौञ्जीक्रिया 9) उपाकर्म,
10) उत्सर्जनम्, 11) पितृमेधः।

**मार्कण्डेयस्मृतिः**
मार्कण्डेयस्मृतौ द्वादशसंस्काराणामुल्लेखः दृश्यते।[2] ते यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तः,
4)जातकर्म, 5) नाम, 6) अन्नप्राशनम्,
7) चौलम्, 8) मौञ्जीव्रतम्, 9) गोदानिकम्,
10)स्नानम्, 11) विवाहः, 12) पैतृमैधिकः।

**व्यासस्मृतिः**
व्यासस्मृतौ षोडशसंस्कारविषये विचारः दृश्यते। यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तः,
4) जातकर्म, 5) नामक्रिया, 6) निष्क्रमणम्,
7) अन्नप्राशनम्, 8) वपनक्रिया, 9) कर्णवेधः,
10) व्रतादेशः, 11) वेदारम्भः, 12) केशान्तः,
13) स्नानम्, 14) उद्वाहः, 15) विवाहग्निपरिग्रहः,
16) मन्त्रेनाग्निसंग्रहश्च।

**अङ्गिरसस्मृतिः**
अङ्गिरसस्मृतौ संस्काराणां संख्या पञ्चविंशतिः। तद्यथा-
1) गर्भाधानम्, 2) पुंसवनम्, 3) सीमन्तः,
4) बलिः(विष्णुबलिरित्यर्थः), 5) जातकृत्यम्, 6) नामकर्म,
7) निष्क्रमः, 8)अन्नप्राशनम्, 9)चौलकर्म,

10)उपनयनम्,
11) तद्व्रतानां चतुष्टयम् (वेदव्रतानां महानाम्नी महाव्रतोपनिषद् गोदानानि),
12) स्नानम्(समावर्त्तनम्), 13) उद्वाहः(विवाहः), 14) आग्रयणम्(नवान्नेष्टिः),
15) अष्टकाः(हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीषु विहितानि श्राद्धानि),
16) सवणाकर्म (श्रावण्यां क्रियमाणं कर्म), 17) प्रत्यवरोहणम्(मार्गशीष्यां क्रियमाणं कर्म),
18) आश्वयुजीकर्म (आश्वयुज्यां क्रियमाणं कर्म), 19) उत्सर्गः (वेदानामुत्सर्जनम्), 20) उपाकर्म (वेदारम्भः), 21) ब्रह्मयज्ञः, 22) पितृयज्ञः, 23) देवयज्ञः, 24) भूतयज्ञः, 25) नृयज्ञः।

**प्रसङ्गेऽस्मिन् प्राप्यते यत्**

स्वेस्वे गृह्ये यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।
कर्त्तव्या भूतिकामेन नान्यथा सिद्धिमृच्छति॥
पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः॥
गर्भाधानं पुंसवनं सीमन्तो बलिरेव च।
जातकृत्यं नामकर्म निष्क्रमोऽन्नप्राशनं परम्॥
चौलकर्मोपनयनं तद्व्रतानां चतुष्टयम्।
स्नानोद्वाहौ चाग्रयणमष्टका च यथातथा॥
श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणम्।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः॥
संस्कारा नियते ह्येते ब्राह्मणस्य विशेषतः [3] ॥इति॥
जातूकर्ण्यस्तु षोडशसंस्कारा प्रतिपादिता, यथा प्राप्यते संस्कारप्रकाशे –
आधानपुंससीमन्तजातनामान्नचौलकाः।
मौञ्जी व्रतानि गोदानसमावर्त्तविवाहकाः॥
अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव तु।
शूद्राणां चैव भवति विवाहश्चान्त्यकर्म च [4] ॥इति॥

**ते संस्काराः**

1) आधानाम्, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामकर्म, 6) अन्नप्राशनम्,
7) चौलकर्म, 8) मौञ्जी, 9) प्राजापत्यम्,
10) साम्यम्, 11) आग्नेयम्, 12) वैश्वदेवम्,
13) गोदानम्, 14) समावर्त्तनम्, 15) विवाहः,
16)अन्त्येष्टिः।

**विष्णुस्मृतिः**

विष्णुस्मृतौ पञ्चदशसंस्काराः प्रतिपादिताः। ते च संस्काराः –
1) निषेककर्म, 2) पुंसवनम्, 3) सीमन्तोन्नयनम्
4) जातकर्म, 5) नामधेयम्, 6) मास्यादित्यदर्शनम्
7) अन्नप्राशनम्, 8) चूडाकरणम्, 9) उपनयनम्
10) वेदाध्ययनम्, 11) पञ्चमहायज्ञाः, 12) चत्वारः पाकयज्ञाः
13) विवाहः, 14) अन्त्येष्टिः, 15) दर्शपौर्णमासयागश्च।

सूत्रस्मृतादिवत् निबन्धग्रन्थेष्वपि संस्काराः वर्णिताः। तेषु प्रमुखनिबन्धग्रन्थेषु उल्लिखितानां संस्काराणां भेदविषये साम्प्रतम् उपस्थाप्यते।

**संस्कारप्रकाशः**

महामहोपाध्यायमित्रमिश्रविरचिते संस्कारप्रकाशग्रन्थे चत्वारिंशदधिकसंस्काराः वर्णिताः। ते यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) अनवलोभनम्,
4) सीमन्तोन्नयनम्, 5) विष्णुबलिः, 6) जातकर्म,
7) नामकरणम्, 8) प्रेङ्खारोहणम्, 9) दुग्धपानम्
10) ताम्बूलभक्षणम्, 11) निष्क्रमणम्, 12) भूम्युपवेशनम्,
13) कटिसूत्रबन्धनम्, 14) कर्णवेधः 15) अङ्कुरार्पणम्,
16) अन्नप्राशनम्, 17) अब्दपूर्त्तिकृत्यम्, 18) चूडाकरणम्,
19) विद्यारम्भः, 20) उपनयनम्, 21) उपाकरणम्,
22) वेदाध्ययनम्, 23) उत्सर्जनम्, 24) महानाम्मनाव्रतम्,
25) गोदानव्रतम्, 26)समावर्त्तनम्, 27) विवाहः,
28) पञ्चमहायज्ञाः, 29)पार्वणश्राद्धम्, 30) पिण्डपितृयज्ञः,
31) नवान्नप्राशनम्, 32) श्रवणाकर्म, 33) इन्द्रयज्ञः,
34) आश्वयुजी, 35) आग्रहायणी, 36) स्रस्तरारोहणम्,
37) अष्टकाकर्म, 38) अन्वष्टका, 39) उपाष्टका,
40) शूलगवः, 41) भूयज्ञश्च।

**संस्कारदीपकः**

संस्कारदीपकग्रन्थे वर्णिताः संस्कराः विंशत्याधिकाः। ते यथा –
1) गर्भाधानम्, 2) पुंसवनम् 3) सीमन्तोन्नयनम्,
4) आयुष्यकरणम्, 5) जातकर्म, 6) षष्ठीमहोत्सवः,
7) नामकरणम्, 8) सूर्यावलोकनम्, 9) निष्क्रमणम्,
10) नवीनपर्याङ्कारोहणम्, 11) दुग्धपानम्, 12) अन्नप्राशनम्,
13) अब्दपूर्त्तिकृत्यम्, 14) कर्णवेधः, 15) विद्यारम्भः,
16) चूडाकरणम्, 17) उपनयनम्, 18) वेदारम्भः,
19) समावर्त्तनम्, 20) केशान्तः(गोदानम्),
21) चत्वारः पाकयज्ञाः(हुतोऽहुतः, प्रहुतः, प्राशितश्च)।

**निर्णयसिन्धुः**

कमलाकरभट्टविरचितनिर्णयसिन्धुग्रन्थे प्रदिपादिताः संस्काराः चतुर्विंशतिः। यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) अनवलोभनम्,
4) सीमन्तोन्नयनम्, 5) जातकर्म, 6) नामकरणम्,
7) दोलारोहणम्, 8) दुग्धपानम्, 9) कर्णवेधः,
10) ताम्बूलदानम्, 11) निष्क्रमणम्, 12) उपवेशनम्,
13) अन्नप्राशनम्, 14) अब्दपूर्त्तिः, 15) कटिसूत्रबन्धनम्,
16) चौलविधिः, 17) विद्यारम्भः, 18) उपनयनम्,
19) ब्रह्मयज्ञारम्भः, 20) महानाम्न्यादिव्रतम्, 21) समावर्त्तनम्,
22) विवाहः, 23) अग्न्याधानम्, 24) अन्त्येष्टिश्च।

**स्मृतिचन्द्रिका (संस्कारकाण्डः)**

देवणभट्टविरचितायां स्मृतिचन्द्रिकायां संस्कारकाण्डे षोडशसंस्काराः आलोचिताः। ते यथा –
1) गर्भाधानम्, 2) पुंसवनम् 3) सीमन्तोन्नयनम्,
4) जातकर्म, 5) नामकरणम्, 6) निष्क्रमणम्,
7) कर्णवेधः, 8) अन्नप्राशनम्, 9) चूडाकरणम्,
10) स्त्रीसंस्काराः, 11) विद्यारम्भः, 12) उपनयनम्,
13) उपाकरणम्, 14) उत्सर्जनम्, 15) समावर्त्तनम्,
16) विवाहश्च।

**भगवन्तभास्करः (संस्कारमयूखः)**

नीलकण्ठभट्टकृत-भगवन्तभास्करग्रन्थस्य संस्कारमयूखे एकोनविंशतिसंस्काराः वर्णिताः। ते यथा –
1) गर्भाधानम्, 2) पुंसवनम्, 3) अनवलोभनम्,
4) सीमन्तोन्नयनम्, 5) जातकर्म, 6) नामकरणम्,
7) कर्णवेधः, 8) निष्क्रमणम्, 9) उपवेशनम्,
10) अन्नप्राशनम्, 11) चूडाकर्म, 12) विद्यारम्भः,
13) उपनयनम्, 14) समावर्त्तनम्, 15) विवाहः,
16)अग्न्याधानम्, 17) पञ्चमहायज्ञाः, 18) सप्तपाकसंस्था,
19) अन्त्येष्टिश्च।

अनेन ज्ञायते यत् संस्कारविषये मतभिन्नता दृश्यते। परन्तु एतेषां संस्काराणां मध्ये षोडशैव संस्काराः सुप्रसिद्धाः, सर्वत्र व्यवहारे च दृश्यन्ते। समाजसंस्थापकाः अपि तदेव स्वीक्रियते। ते च संस्काराः –

| | | |
|---|---|---|
| 1) गर्भाधानम्, | 2) पुंसवनम्, | 3) सीमन्तोन्नयनम्, |
| 4) जातकर्म, | 5) नामकरणम्, | 6) निष्क्रमणम्, |
| 7) अन्नप्राशनम्, | 8) चूडाकरणम्, | 9) कर्णवेधः, |
| 10) विद्यारम्भः, | 11) उपनयनम्, | 12) वेदारम्भः, |
| 13) केशान्तः, | 14) समावर्त्तनम्, | 15) विवाहः, |
| 16) अन्त्येष्टिः। | | |

तत्रैतेषु प्रतिपाद्येषु षोडशसंस्कारेषु श्रीवात्मनो गर्भाधानमारम्भान्त्येष्टिपर्यन्तमेकशरीरसम्बन्धत्वात् तथैव संस्काराणाञ्च प्रायेण शरीरशुद्धिकरणत्वात् शास्त्रेषु प्रथमं तावत् गर्भाधानाख्यसंस्काराः वर्णिताः सन्ति। मनुनापि प्रसङ्गेऽस्मिन् प्रतिपादितं यत् –

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् [5] ।।इति।।

अत्र निषेकशब्दो निषिच्यते रेतोऽत्र कर्मणि इति व्युत्पत्तेर्गर्भाधानमेवार्थः [6] । तथैव याज्ञवल्क्येनापि प्रसङ्गेऽस्मिन् –

निषेकादिश्मशानान्तास्तेषां वै मन्त्रतः क्रिया [7] ।

इत्यभिहितम्। स्पष्टीकृतश्चायमर्थो मिताक्षरायामपि – “निषेकाद्याः – निषेको गर्भाधानामाद्यो यासां तास्तथोक्ताः। श्मशानं पितृवनम्, तत्सम्बन्धि कर्म अन्तो यासां ताः क्रिया मन्त्रैर्भवन्ति [8]” इति प्रकारेण। अत एव च प्रायेण गृह्यसूत्रादौ निबन्धेषु च संस्कारानिरूपणं गर्भाधानामरभ्यैव कृतं दृश्यते। आश्वलायन-पारस्कर-बौधायन-गृह्यसूत्रेषु पुनः स्त्रीसम्बन्धमन्तरा गर्भाधानस्यासम्भवत्वं निरूप्य विवाहाद्या एव संस्काराः प्रख्यापिताः। वाराहगृह्यसूत्रे तु जन्मत एवात्मनः संस्क्रियमाणशरीरसम्बन्धोपलम्भात् जातकर्मसंस्कारस्यैव प्राथम्यमुक्तम्। अन्यत्र तु प्रायेण गर्भाधानस्यैवाद्यासंस्कारतयोल्लेखो दृश्यते।
नवग्रहैः स्वस्वदशाकाले प्रदीयमानस्य शुभाशुभफलस्य विवेचनम् अस्मिन् अध्याये क्रियते। ग्रहाणां दशायां प्रकारद्वयेन फलम् उपलभ्यते ।
अ. साधारणफलम् ।
आ. विशिष्टफलञ्चेति ।
स्वभावानुगुणं ग्रहस्य यत् फलं प्रोक्तं तत्साधारणफलमित्युच्यते । ग्रहस्थानस्थितिवशात् यत्फलम् उदीर्यते तत्तु विशिष्टफलमित्यभिधीयते ।

“साधारणविशेषाभ्यां द्विधा प्रोक्तं दशाफलम् ।
स्वभाववस्थानवशतः खगानां मुनिसम्मतम् ।।” [6] इति ।

अत्र खेटानां बलानुसारेण दशाफलं निर्दिशेत् । ग्रहे आदिद्रेक्काणगे सति दशारम्भे, मध्यद्रेष्कणगे दशामध्ये, तृतीयद्रेक्काणगे अन्ते फलं वदेत् ।
“व्यस्तं खेटे च वक्रिणी” इत्युक्तत्वात् वक्रिग्रहाणां दशाफलं वैपरीत्येन निर्दिशेत् । दशारम्भे दशेशे सौम्ययुतेक्षिते, स्वर्क्षतुङ्गमित्रक्षेत्रे वा सति तद्दशाफलं शोभनमिति कथ्यते । दशेशे षष्ठाष्टमव्ययस्थिते, अस्तङ्गते, नीचशत्रुस्थे सति तद्दशाफलम् अशोभनमित्युच्यते ।

**सन्धर्व सूची**


1. या.स्मृ.- 1/11-14
2. गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
   नामान्नप्राशनं चौलं मौञ्जीव्रतचतुष्टयम्।।
   गोदानिकं तथा स्नानं विवाहः पैत्रमैधिकः।
   एकविंशतियज्ञास्तु नित्या ये वेदचोदितः।। (मा.स्मृ. पृ. - 25)
3. सं.प्र.पृष्ठा- 135-136
4. सं.प्र.पृष्ठा- 135
5. म.स्मृ.- 2/16
6. म.मु.- 2/16
7. या.स्मृ.- 1/10
8. मिता.- 1/10
9. बृ.प.हो - 48-2 ।